श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमदान्ध्रपूर्णैरनुगृहीतं

# ॥ श्रीरामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीरामानुजयोगीन्द्रक्षीरकैङ्कर्यशालिने।
नमो वटुकपूर्णाय महनीयगुणाब्धये॥

रामानुजः पुष्कराक्षो यतीन्द्रः करुणाकरः।
कान्तिमत्यात्मजः श्रीमान् लीलामानुषविग्रहः॥ १॥

सर्वशास्त्रार्थतत्वज्ञः सर्वज्ञस्सज्जनप्रियः।
नारायणकृपापात्रं श्रीभूतपुरनायकः॥ २॥

अनघो भक्तमन्दारः केशवानन्दवर्धनः।
काञ्चीपूर्णप्रियसखः प्रणतार्तिविनाशनः॥ ३॥

पुण्यसङ्कीर्तनः पुण्यो ब्रह्मराक्षसमोचकः।
यादवापादितापार्थ वृक्षच्छेदकुठारकः॥ ४॥

अमोघो लक्ष्मणमुनिः शारदाशोकनाशनः।
निरन्तरजनाज्ञान निर्मोचनविचक्षणः॥ ५॥

वेदान्तद्वयसारज्ञो वरदायाम्बुदायकः।
पराभिप्रायतत्त्वज्ञो यामुनाङ्गुळिमोचकः॥ ६॥

देवराजकृपालब्ध षड्वाक्यार्थमहोदधिः।
पूर्णार्यलब्धसन्मन्त्रश्शौरिपादाब्जषट्पदः॥ ७॥

त्रिदण्डधारी ब्रह्मज्ञो ब्रह्मज्ञानपरायणः।
रङ्गेशकैङ्कर्यरतो विभूतिद्वयनायकः॥ ८॥

गोष्ठीपूर्णकृपालब्ध मन्त्रराजप्रकाशकः।
वररङ्गानुकम्पात्त द्राविडाम्नायपारगः॥ ९॥

www.prapatti.com

मालाधरार्यसुज्ञात द्राविडाम्नायतत्त्वधीः ।
चतुस्सप्ततिशिष्याढ्यः पञ्चाचार्यपदाश्रयः ॥ १० ॥

प्रपीतविषतीर्थाम्भः प्रकटीकृतवैभवः ।
प्रणतार्तिहराचार्य दत्तभिक्षैकभोजनः ॥ ११ ॥

पवित्रीकृतकूरेशो भागिनेयत्रिदण्डकः ।
कूरेशदाशरथ्यादि चरमार्थप्रदायकः ॥ १२ ॥

रङ्गेशवेङ्कटेशादि प्रकटीकृतवैभवः ।
देवराजार्चनरतो मूकमुक्तिप्रदायकः ॥ १३ ॥

यज्ञमूर्तिप्रतिष्ठाता मन्त्रदो धरणीधरः ।
वरदाचार्यसद्भक्तो यज्ञेशार्तिविनाशकः ॥ १४ ॥

अनन्ताभीष्टफलदो विठलेन्द्रप्रपूजितः ।
श्रीशैलपूर्णकरुणालब्धरामायणार्थकः ॥ १५ ॥

प्रपत्तिधर्मैकरतो गोविन्दार्यप्रियानुजः ।
व्याससूत्रार्थतत्त्वज्ञो बोधायनमतानुगः ॥ १६ ॥

श्रीभाष्यादिमहाग्रन्थकारकः कलिनाशनः ।
अद्वैतमतविच्छेत्ता विशिष्टाद्वैतपारगः ॥ १७ ॥

कुरङ्गनगरीपूर्णमन्त्ररत्नोपदेशकः ।
विनाशिताखिलमतश्शेषीकृतरमापतिः ॥ १८ ॥

पुत्रीकृतशठारातिश्शठारात्यृणमोचकः ।
भाषादत्तहयग्रीवो भाष्यकारो महायशाः ॥ १९ ॥

पवित्रीकृतभूभागः कूर्मनाथप्रकाशकः ।
श्रीवेङ्कटाचलाधीश शङ्खचक्रप्रदायकः ॥ २० ॥

www.prapatti.com

श्रीवेङ्कटेशश्वशुरश्श्रीरमासखदेशिकः।
कृपामात्रप्रसन्नार्यो गोपिकामोक्षदायकः॥ २१॥

समीचीनार्यसच्छिष्यः सत्कृतो वैष्णवप्रियः।
क्रिमिकण्ठनृपध्वंसी सर्वमन्त्रमहोदधिः॥ २२॥

अङ्गीकृतान्ध्रपूर्णाख्यस्सालग्रामप्रतिष्ठितः।
श्रीभक्तग्रामपूर्णेशो विष्णुवर्धनरक्षकः॥ २३॥

बौद्धध्वान्तसहस्रांशुश्शेषरूपप्रदर्शकः।
नगरीकृतवेदाद्रिः डिल्लीश्वरसमर्चितः॥ २४॥

नारायणप्रतिष्ठाता सम्पत्पुत्रविमोचकः।
सम्पत्कुमारजनकस्साधुलोकशिखामणिः॥ २५॥

सुप्रतिष्ठितगोविन्दराजः पूर्णमनोरथः।
गोदाग्रजो दिग्विजेता गोदाभीष्टप्रपूरकः॥ २६॥

सर्वसंशयविच्छेत्ता विष्णुलोकप्रदायकः।
अव्याहतमहद्वर्त्मा यतिराजो जगद्गुरुः॥ २७॥

एवं रामानुजार्यस्य नाम्नामष्टोत्तरं शतम्।
यः पठेच्छृणुयाद्वापि सर्वान् कामानवाप्नुयात्॥ २८॥

यदान्ध्रपूर्णेन महात्मनेदं
स्तोत्रं कृतं सर्वजनावनाय।
तज्जीवभूतं भुवि वैष्णवानां
बभूव रामानुजमानसानाम्॥ २९॥

॥ इति श्रीरामानुजाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥